# shrIgaNeshastotram

# શ્રીગણેશસ્તોત્રમ્

## Document Information

Text title : gaNeshastotra

File name : gaNeshastotra.itx

Category : ganesha, stotra

Location : doc_ganesha

Transliterated by : Pooja P

Proofread by : Pooja P

Description-comments : Shri-Maha-Ganapati-Sadhana from Kalyan-Mandir

Source : shAradAtilakataH

Latest update : May 21, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2025

*sanskritdocuments.org*

# શ્રીગણેશસ્તોત્રમ્

મહાગણપતિસ્તોત્રમ્

વક્રતુણ્ડગણેશસ્તવરાજઃ

ૐકારમાદ્યં પ્રવદન્તિ સન્તો વાચઃ શ્રુતિનામપિ યે ગૃણન્તિ ।
ગજાનનં દેવગણાનતાંઘ્રિં ભજેઽહમર્દ્ધેન્દુકૃતાવતંસમ્ ॥ ૧॥

પાદારવિન્દાર્ચનતત્પરાણાં સંસારદાવાનલભઙ્ગદક્ષમ્ ।
નિરન્તરં નિર્ગતદાનતોયૈસ્તં નૌમિ વિઘ્નેશ્વરમમ્બુજાભમ્ ॥ ૨॥

કૃતાઙ્ગરાગં નવકુંકુમેન, મત્તાલિમાલાં મદપઙ્કલગ્નામ્ ।
નિવારયન્તં નિજકર્ણતાલૈઃ, કો વિસ્મરેત્ પુત્રમનઙ્ગશત્રોઃ ॥ ૩॥

શમ્ભોર્જટાજૂટનિવાસિગઙ્ગાજલં સમાનીય કરામ્બુજેન ।
લીલાભિરારાચ્છિવમર્ચયન્તં, ગજાનનં ભક્તિયુતા ભજન્તિ ॥ ૪॥

કુમારભુક્તૌ પુનરાત્મહેતોઃ, પયોધરૌ પર્વતરાજપુત્ર્યાઃ ।
પ્રક્ષાલયન્તં કરશીકરેણ, મૌગ્ધ્યેન તં નાગમુખં ભજામિ ॥ ૫॥

ત્વયા સમુદ્ધૃત્ય ગજાસ્યહસ્તં, શીકરાઃ પુષ્કરરન્ધ્રમુક્તાઃ ।
વ્યોમાઙ્ગને તે વિચરન્તિ તારાઃ, કાલાત્મના મૌક્તિકતુલ્યભાસઃ ॥ ૬॥

ક્રીડારતે વારિનિધૌ ગજાસ્યે, વેલામતિક્રામતિ વારિપૂરે ।
કલ્પાવસાનં પરિચિન્ત્ય દેવાઃ, કૈલાસનાથં શ્રુતિભિઃ સ્તુવન્તિ ॥ ૭॥

નાગાનને નાગકૃતોત્તરીયે, ક્રીડારતે દેવકુમારસઙ્ઘૈઃ ।
ત્વયિ ક્ષણં કાલગતિં વિહાય, તૌ પ્રાપતુઃ કન્દુકતામિનેન્દુ ॥ ૮॥

મદોલ્લસત્પઞ્ચમુખૈરજસ્રમધ્યાપયન્તં સકલાગમાર્થાન્ ।
દેવાન્ ઋષીન્ ભક્તજનૈકમિત્રં, હેરમ્બમર્કારુણમાશ્રયામિ ॥ ૯॥

પાદામ્બુજાભ્યામતિકોમલાભ્યાં, કૃતાર્થયન્તં કૃપયા ધરિત્રીમ્ ।
અકારણં કારણમાપ્તવાચાં, તન્નાગવક્ત્રં ન જહાતિ ચેતઃ ॥ ૧૦॥

યેનાર્પિતં સત્યવતીસુતાય, પુરાણમાલિખ્ય વિષાણકોટ્યા ।
તં ચન્દ્રમૌલેસ્તનયં તપોભિરારાધ્યમાનન્દઘનં ભજામિ ॥ ૧૧॥

પદં શ્રુતીનામપદં સ્તુતીનાં, લીલાવતારં પરમાત્મમૂર્તેઃ ।
નાગાત્મકો વા પુરુષાત્મકો વેત્યભેદ્યમાદ્યં ભજ વિઘ્નરાજમ્ ॥ ૧૨॥

પાશાંકુશૌ ભગ્નરદં ત્વભીષ્ટં, કરૈર્દધાનં કરરન્ધ્રમુક્તૈઃ ।
મુક્તાફલાભૈઃ પૃથુશીકરૌઘૈઃ, સિઞ્ચન્તમઙ્ગં શિવયોર્ભજામિ ॥ ૧૩॥

અનેકમેકં ગજમેકદન્તં, ચૈતન્યરૂપં જગદાદિબીજમ્ ।
બ્રહ્મેતિ યં બ્રહ્મવિદો વદન્તિ, તં શમ્ભુસૂનું સતતં ભજામિ ॥ ૧૪॥

અઙ્કે સ્થિતાયા નિજવલ્લભાયા, મુખામ્બુજાલોકનલોલનેત્રમ્ ।
સ્મેરાનનાબ્જં મદવૈભવેન, રુદ્ધં ભજે વિશ્વવિમોહનં તમ્ ॥ ૧૫॥

યે પૂર્વમારાધ્ય ગજાનન! ત્વાં, સર્વાણિ શાસ્ત્રાણિ પઠન્તિ તેષામ્ ।
ત્વત્તો ન ચાન્યત્ પ્રતિપાદ્યમસ્તિ, તદસ્તિ ચેત્ સત્યમસત્યકલ્પમ્ ॥ ૧૬॥

હિરણ્યવર્ણં જગદીશિતારં, કવિં પુરાણં રવિમણ્ડલસ્થમ્ ।
ગજાનનં યં પ્રવદન્તિ સન્તસ્તત્ કાલયોગૈસ્તમહં પ્રપદ્યે ॥ ૧૭॥

વેદાન્ત ગીતં પુરુષં ભજેઽહમાત્માનમાનન્દઘનં હૃદિસ્થમ્ ।
ગજાનનં યન્મહસા જનાનાં, વિઘ્નાન્ધકારો વિલયં પ્રયાતિ ॥ ૧૮॥

શમ્ભોઃ સમાલોક્ય જટાકલાપે, શશાઙ્કખણ્ડં નિજપુષ્કરેણ ।
સ્વભગ્નદન્તં પ્રવિચિન્ત્ય મૌગ્ધ્યાદાકર્ષ્ટુકામઃ શ્રિયમાતનોતુ ॥ ૧૯॥

વિઘ્નાર્ગલાનાં વિનિપાતનાર્થં, યં નારિકેલૈઃ કદલીફલાદ્યૈઃ ।
પ્રભાવયન્તો મદવારણાસ્યં, પ્રભું સદાઽભીષ્ટમહં ભજે તમ્ ॥ ૨૦॥

॥ ફલશ્રુતિ ॥

યજ્ઞૈરનેકૈર્બહુભિસ્તપોભિરારાધ્યમાદ્યં ગજરાજવક્ત્રમ્ ।
સ્તુત્યાઽનયા યે વિધિના સ્તુવન્તિ, તે સર્વલક્ષ્મીનિધયો ભવન્તિ ॥ ૧॥

॥ ઇતિ શારદાતિલકતઃ શ્રીગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Pooja P

*shrIgaNeshastotram*

pdf was typeset on May 11, 2025

Please send corrections to *sanskrit@cheerful.com*